# NakShatrasukta

# નક્ષત્રસૂક્તમ્

## Document Information

Text title : nakshatrasuuktaM

File name : nakshatra.itx

Category : sUkta, veda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Latest update : June 14, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

# નક્ષત્રસૂક્તમ્

તૈત્તિરીય બ્રાહ્મણમ્ । અષ્ટકમ્ - ૩ પ્રશ્નઃ ૧
તૈત્તિરીય સંહિતા । કાણ્ડ ૩ પ્રપાઠકઃ - ૫ અનુવાક -૧

ૐ ॥ અગ્નિર્નઃ પાતુ કૃત્તિકાઃ। નક્ષત્રં દેવમિન્દ્રિયમ્।
ઇદમાસાં વિચક્ષણમ્। હવિરાસં જુહોતન।
યસ્ય ભાન્તિ રશ્મયો યસ્ય કેતવઃ। યસ્યેમા વિશ્વા ભુવનાનિ સર્વા।
સ કૃત્તિકાભિરભિસંવસાનઃ। અગ્નિર્નો દેવસ્સુવિતે દધાતુ ॥ ૧॥

પ્રજાપતે રોહિણીવેતુ પત્ની। વિશ્વરૂપા બૃહતી ચિત્રભાનુઃ।
સા નો યજ્ઞસ્ય સુવિતે દધાતુ। યથા જીવેમ શરદસ્સવીરાઃ।
રોહિણી દેવ્યુદગાત્પુરસ્તાત્। વિશ્વા રૂપાણિ પ્રતિમોદમાના।
પ્રજાપતિꣳ હવિષા વર્ધયન્તી। પ્રિયા દેવાનામુપયાતુ યજ્ઞમ્ ॥ ૨॥

સોમો રાજા મૃગશીર્ષેણ આગન્ન્। શિવં નક્ષત્રં પ્રિયમસ્ય ધામ।
આપ્યાયમાનો બહુધા જનેષુ। રેતઃ પ્રજાં યજમાને દધાતુ।
યત્તે નક્ષત્રં મૃગશીર્ષમસ્તિ। પ્રિયꣳ રાજન્ પ્રિયતમં પ્રિયાણામ્।
તસ્મૈ તે સોમ હવિષા વિધેમ। શન્ન એધિ દ્વિપદે શં ચતુષ્પદે ॥ ૩॥

આર્દ્રયા રુદ્રઃ પ્રથમા ન એતિ। શ્રેષ્ઠો દેવાનાં પતિરઘ્નિયાનામ્।
નક્ષત્રમસ્ય હવિષા વિધેમ। મા નઃ પ્રજાꣳ રીરિષન્મોત વીરાન્।
હેતિ રુદ્રસ્ય પરિણો વૃણક્તુ। આર્દ્રા નક્ષત્રં જુષતાꣳ હવિર્નઃ।
પ્રમુઞ્ચમાનૌ દુરિતાનિ વિશ્વા। અપાઘશꣳસન્નુદતામરાતિમ્। ॥ ૪॥

પુનર્નો દેવ્યદિતિસ્પૃણોતુ। પુનર્વસૂનઃ પુનરેતાં યજ્ઞમ્।
પુનર્નો દેવા અભિયન્તુ સર્વે। પુનઃ પુનર્વો હવિષા યજામઃ।
એવા ન દેવ્યદિતિરનર્વા। વિશ્વસ્ય ભર્ત્રી જગતઃ પ્રતિષ્ઠા।

પુનર્વસૂ હવિષા વર્ધયન્તી। પ્રિયમ્ દેવાનામપ્યેતુ પાથઃ ॥ ૫॥

બૃહસ્પતિઃ પ્રથમં જાયમાનઃ। તિષ્યં નક્ષત્રમભિ સંબભૂવ।
શ્રેષ્ઠો દેવાનાં પૃતનાસુજિષ્ણુઃ। દિશોઽનુ સર્વા અભયન્નો અસ્તુ।
તિષ્યઃ પુરસ્તાદુત મધ્યતો નઃ। બૃહસ્પતિર્નઃ પરિપાતુ પશ્ચાત્।
બાધેતાન્દ્વેષો અભયં કૃણુતામ્। સુવીર્યસ્ય પતયસ્યામ ॥ ૬ ॥

ઇદꣳ સર્પેભ્યો હવિરસ્તુ જુષ્ટમ્। આશ્રેષા યેષામનુયન્તિ ચેતઃ।
યે અન્તરિક્ષં પૃથિવીં ક્ષિયન્તિ। તે નસ્સર્પાસો હવમાગમિષ્ઠાઃ।
યે રોચને સૂર્યસ્યાપિ સર્પાઃ। યે દિવં દેવીમનુસઞ્ચરન્તિ।
યેષમશ્રેષા અનુયન્તિ કામમ્। તેભ્યસ્સર્પેભ્યો મધુમજ્જુહોમિ ॥ ૭ ॥

ઉપહૂતાઃ પિતરો યે મઘાસુ। મનોજવસસ્સુકૃતસ્સુકૃત્યાઃ।
તે નો નક્ષત્રે હવમાગમિષ્ઠાઃ। સ્વધાભિર્યજ્ઞં પ્રયતં જુષન્તામ્।
યે અગ્નિદગ્ધા યેઽનગ્નિદગ્ધાઃ। યેઽમુલ્લોકં પિતરઃ ક્ષિયન્તિ।
યાꣳશ્ચ વિદ્મયાꣳ ઉ ચ ન પ્રવિદ્મ। મઘાસુ યજ્ઞꣳ સુકૃતમ્ જુષન્તામ્ ॥ ૮॥

ગવાં પતિઃ ફલ્ગુનીનામસિ ત્વમ્। તદર્યમન્ વરુણમિત્ર ચારુ।
તં ત્વા વયꣳ સનિતારꣳસનીનામ્। જીવા જીવન્તમુપ સંવિશેમ।
યેનેમા વિશ્વા ભુવનાનિ સઞ્જિતા। યસ્ય દેવા અનુસંયન્તિ ચેતઃ।
અર્યમા રાજાઽજરસ્તુ વિષ્માન્। ફલ્ગુનીનામૃષભો રોરવીતિ ॥ ૯ ॥

શ્રેષ્ઠો દેવાનાં ભગવો ભગાસિ। તત્ત્વા વિદુઃ ફલ્ગુનીસ્તસ્ય વિત્તાત્।
અસ્મભ્યં ક્ષત્રમજરꣳસુવીર્યમ્। ગોમદશ્વવદુપસન્નુદેહ।
ભગોહ દાતા ભગ ઇત્પ્રદાતા। ભગો દેવીઃ ફલ્ગુનીરાવિવેશ।
ભગસ્યેત્તં પ્રસવં ગમેમ। યત્ર દેવૈસ્સધમાદં મદેમ। ॥ ૧૦ ॥

આયાતુ દેવસ્સવિતોપયાતુ। હિરણ્યયેન સુવૃતા રથેન।
વહન્ હસ્તꣳસુભગં વિદ્મનાપસમ્। પ્રયચ્છન્તં પપુરિં પુણ્યમચ્છ।
હસ્તઃ પ્રયચ્છ ત્વમૃતં વસીયઃ। દક્ષિણેન પ્રતિગૃભ્ણીમ એનત્।
દાતારમદ્ય સવિતા વિદેય। યો નો હસ્તાય પ્રસુવાતિ યજ્ઞમ્ ॥૧૧ ॥

ત્વષ્ટા નક્ષત્રમભ્યેતિ ચિત્રામ્। સુભꣳ સસંયુવતિꣳ રોચમાનામ્।

નિવેશયન્નમૃતાન્મર્ત્યાꣳશ્ચ। રૂપાણિ પિꣳશન્ ભુવનાનિ વિશ્વા।
તન્નસ્ત્વષ્ટા તદુ ચિત્રા વિચષ્ટામ્। તન્નક્ષત્રં ભૂરિદા અસ્તુ મહ્યમ્।
તન્નઃ પ્રજાં વીરવતીꣳ સનોતુ। ગોભિર્નો અશ્વૈસ્સમનક્તુ યજ્ઞમ્ ॥ ૧૨ ॥

વાયુર્નક્ષત્રમભ્યેતિ નિષ્ટ્યામ્। તિગ્મશૃંગો વૃષભો રોરુવાણઃ।
સમીરયન્ ભુવના માતરિશ્વા। અપ દ્વેષાꣳસિ નુદતામરાતીઃ।
તન્નો વાયસ્તદુ નિષ્ટ્યા શૃણોતુ। તન્નક્ષત્રં ભૂરિદા અસ્તુ મહ્યમ્।
તન્નો દેવાસો અનુજાનન્તુ કામમ્। યથા તરેમ દુરિતાનિ વિશ્વા ॥ ૧૩ ॥

દૂરમસ્મચ્છત્રવો યન્તુ ભીતાઃ। તદિન્દ્રાગ્ની કૃણુતાં તદ્વિશાખે।
તન્નો દેવા અનુમદન્તુ યજ્ઞમ્। પશ્ચાત્ પુરસ્તાદભયન્નો અસ્તુ।
નક્ષત્રાણામધિપત્ની વિશાખે। શ્રેષ્ઠાવિન્દ્રાગ્ની ભુવનસ્ય ગોપૌ।
વિષૂચશ્શત્રૂનપબાધમાનૌ। અપક્ષુધન્નુદતામરાતિમ્। ॥ ૧૪ ॥

પૂર્ણા પશ્ચાદુત પૂર્ણા પુરસ્તાત્। ઉન્મધ્યતઃ પૌર્ણમાસી જિગાય।
તસ્યાં દેવા અધિસંવસન્તઃ। ઉત્તમે નાક ઇહ માદયન્તામ્।
પૃથ્વી સુવર્ચા યુવતિઃ સજોષાઃ। પૌર્ણમાસ્યુદગાચ્છોભમાના।
આપ્યાયયન્તી દુરિતાનિ વિશ્વા। ઉરું દુહાં યજમાનાય યજ્ઞમ્।

ઋદ્ધ્યાસ્મ હવ્યૈર્નમસોપસદ્ય। મિત્રં દેવં મિત્રધેયં નો અસ્તુ।
અનૂરાધાન્ હવિષા વર્ધયન્તઃ। શતં જીવેમ શરદઃ સવીરાઃ।
ચિત્રં નક્ષત્રમુદગાત્પુરસ્તાત્। અનૂરાધા સ ઇતિ યદ્વદન્તિ।
તન્મિત્ર એતિ પથિભિર્દેવયાનૈઃ। હિરણ્યયૈર્વિતતૈરન્તરિક્ષે ॥ ૧૬ ॥

ઇન્દ્રો જ્યેષ્ઠામનુ નક્ષત્રમેતિ। યસ્મિન્ વૃત્રં વૃત્ર તૂર્યે તતાર।
તસ્મિન્વયમમૃતં દુહાનાઃ। ક્ષુધન્તરેમ દુરિતિં દુરિષ્ટિમ્।
પુરન્દરાય વૃષભાય ધૃષ્ણવે। અષાઢાય સહમાનાય મીઢુષે।
ઇન્દ્રાય જ્યેષ્ઠા મધુમદ્દુહાના। ઉરું કૃણોતુ યજમાનાય લોકમ્। ॥ ૧૭ ॥

મૂલં પ્રજાં વીરવતીં વિદેય। પરાચ્યેતુ નિરૃતિઃ પરાચા।
ગોભિર્નક્ષત્રં પશુભિસ્સમક્તમ્। અહર્ભૂયાદ્યજમાનાય મહ્યમ્।
અહર્નો અદ્ય સુવિતે દદાતુ। મૂલં નક્ષત્રમિતિ યદ્વદન્તિ।
પરાચીં વાચા નિરૃતિં નુદામિ। શિવં પ્રજાયૈ શિવમસ્તુ મહ્યમ્ ॥ ૧૮ ॥

યા દિવ્યા આપઃ પયસા સમ્બભૂવુઃ। યા અન્તરિક્ષ ઉત પાર્થિવીર્યાઃ।
યાસામષાઢા અનુયન્તિ કામમ્। તા ન આપઃ શꣳ સ્યોના ભવન્તુ।
યાશ્ચ કૂપ્યા યાશ્ચ નાદ્યાસ્સમુદ્રિયાઃ। યાશ્ચ વૈશન્તીરુત પ્રાસચીર્યાઃ।
યાસામષાઢા મધુ ભક્ષયન્તિ। તા ન આપઃ શꣳ સ્યોના ભવન્તુ ॥૧૯ ॥

તન્નો વિશ્વે ઉપ શ‌ૃણ્વન્તુ દેવાઃ। તદષાઢા અભિસંયન્તુ યજ્ઞમ્।
તન્નક્ષત્રં પ્રથતાં પશુભ્યઃ। કૃષિર્વૃષ્ટિર્યજમાનાય કલ્પતામ્।
શુભ્રાઃ કન્યા યુવતયસ્સુપેશસઃ। કર્મકૃતસ્સુકૃતો વીર્યાવતીઃ।
વિશ્વાન્ દેવાન્ હવિષા વર્ધયન્તીઃ। અષાઢાઃ કામમુપાયન્તુ યજ્ઞમ્ ॥ ૨૦ ॥

યસ્મિન્ બ્રહ્માભ્યજયત્સર્વમેતત્। અમુઞ્ચ લોકમિદમૂચ સર્વમ્।
તન્નો નક્ષત્રમભિજિદ્વિજિત્ય। શ્રિયં દધાત્વહૃણીયમાનમ્।
ઉભૌ લોકૌ બ્રહ્મણા સઞ્જિતેમૌ। તન્નો નક્ષત્રમભિજિદ્વિચષ્ટામ્।
તસ્મિન્વયં પૃતનાસ્સઞ્જયેમ। તન્નો દેવાસો અનુજાનન્તુ કામમ્ ॥ ૨૧ ॥

શ‌ૃણ્વન્તિ શ્રોણામમૃતસ્ય ગોપામ્। પુણ્યામસ્યા ઉપશ‌ૃણોમિ વાચમ્।
મહીં દેવીં વિષ્ણુપત્નીમજૂર્યામ્। પ્રતીચી મેનાꣳ હવિષા યજામઃ।
ત્રેધા વિષ્ણુરુરુગાયો વિચક્રમે। મહીં દિવં પૃથિવીમન્તરિક્ષમ્।
તચ્છ્રોણૈતિશ્રવ ઇચ્છમાના। પુણ્યꣳ શ્લોકં યજમાનાય કૃણ્વતી ॥ ૨૨ ॥

અષ્ટૌ દેવા વસવસ્સોમ્યાસઃ। ચતસ્રો દેવીરજરાઃ શ્રવિષ્ઠાઃ।
તે યજ્ઞં પાન્તુ રજસઃ પુરસ્તાત્। સંવત્સરીણમમૃતꣳસ્વસ્તિ।
યજ્ઞં નઃ પાન્તુ વસવઃ પુરસ્તાત્। દક્ષિણતોઽભિયન્તુ શ્રવિષ્ઠાઃ।
પુણ્યન્નક્ષત્રમભિ સંવિશામ। મા નો અરાતિરઘશꣳસાઽગન્ ॥ ૨૩ ॥

ક્ષત્રસ્ય રાજા વરુણોઽધિરાજઃ। નક્ષત્રાણાꣳ શતભિષગ્વસિષ્ઠઃ।
તૌ દેવેભ્યઃ કૃણુતિ દીર્ઘમાયુઃ। શતꣳ સહસ્રા ભેષજાનિ ધત્તઃ।
યજ્ઞન્નો રાજા વરુણ ઉપયાતુ। તન્નો વિશ્વે અભિ સંયન્તુ દેવાઃ।
તન્નો નક્ષત્રꣳ શતભિષગ્જુષાણમ્। દીર્ઘમાયુઃ પ્રતિરદ્ભેષજાનિ ॥ ૨૪ ॥

અજ એકપાદુદગાત્પુરસ્તાત્। વિશ્વા ભૂતાનિ પ્રતિ મોદમાનઃ।
તસ્ય દેવાઃ પ્રસવં યન્તિ સર્વે। પ્રોષ્ઠપદાસો અમૃતસ્ય ગોપાઃ।

વિભ્રાજમાનસ્સમિધા ન ઉગ્રઃ। આઽન્તરિક્ષમરુહદગન્દ્યામ્।
તꣳ સૂર્યં દેવમજમેકપાદમ્। પ્રોષ્ઠપદાસો અનુયન્તિ સર્વે ॥ ૨૫ ॥

અહિર્બુધ્નિયઃ પ્રથમા ન એતિ। શ્રેષ્ઠો દેવાનામુત માનુષાણામ્।
તં બ્રાહ્મણાસ્સોમપાસ્સોમ્યાસઃ। પ્રોષ્ઠપદાસો અભિરક્ષન્તિ સર્વે।
ચત્વાર એકમભિ કર્મ દેવાઃ। પ્રોષ્ઠપદા સ ઇતિ યાન્ વદન્તિ।
તે બુધ્નિયં પરિષદ્યꣳસ્તુવન્તઃ। અહિꣳરક્ષન્તિ નમસોપસદ્ય ॥ ૨૬ ॥

પૂષા રેવત્યન્વેતિ પન્થામ્। પુષ્ટિપતી પશુપા વાજબસ્ત્યૌ।
ઇમાનિ હવ્યા પ્રયતા જુષાણા। સુગૈર્નો યાનૈરુપયાતાં યજ્ઞમ્।
ક્ષુદ્રાન્ પશૂન્ રક્ષતુ રેવતી નઃ। ગાવો નો અશ્વાꣳ અન્વેતુ પૂષા।
અન્નꣳ રક્ષન્તૌ બહુધા વિરૂપમ્। વાજꣳસનુતાં યજમાનાય યજ્ઞમ્ ॥ ૨૭ ॥

તદશ્વિનાવશ્વયુજોપયાતામ્। શુભઙ્ગમિષ્ઠૌ સુયમેભિરશ્વૈઃ।
સ્વં નક્ષત્રꣳ હવિષા યજન્તૌ। મધ્વાસમ્પૃક્તૌ યજુષા સમક્તૌ।
યૌ દેવાનાં ભિષજૌ હવ્યવાહૌ। વિશ્વસ્ય દૂતવમૃતસ્ય ગોપૌ।
તૌ નક્ષત્રં જુજુષાણોપયાતામ્। નમોઽશ્વિભ્યાં કૃણુમોઽશ્વયુગ્ભ્યામ્ ॥ ૨૮ ॥

અપ પાપ્માનં ભરણીર્ભરન્તુ। તદ્યમો રાજા ભગવાન્ વિચષ્ટામ્।
લોકસ્ય રાજા મહતો મહાન્ હિ। સુગં નઃ પન્થામભયં કૃણોતુ।
યસ્મિન્નક્ષત્રે યમ એતિ રાજા। યસ્મિન્નેનમભ્યષિંચન્ત દેવાઃ।
તદસ્ય ચિત્રꣳ હવિષા યજામ। અપ પાપ્માનં ભરણીર્ભરન્તુ ॥ ૨૯ ॥

નિવેશની સઙ્ગમની વસૂનાં વિશ્વા રૂપાણિ વસૂન્યાવેશયન્તી।
સહસ્રપોષꣳ સુભગા રરાણા સા ન આગન્વર્ચસા સંવિદાના॥

યત્તે દેવા અદધુર્ભાગધેયમમાવાસ્યે સંવસન્તો મહિત્વા।
સા નો યજ્ઞં પિપૃહિ વિશ્વવારે રયિન્નો ધેહિ સુભગે સુવીરમ્।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

Encoded with Accents by Rajagopal Iyer

*NakShatrasukta*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*